८४ वैष्णवनामावली

श्रीविठ्ठलमहं वंदे स्वकीय जन वल्लभं । चतुर्शीति भक्तानां व्यक्तिकुर्वे यथार्थतः ।।१।।
दामोदर कृष्णदासौ पुनः दामोदरस्तथा । पद्मनाभश्च तुलसां पार्वती रघुनाथकः ।।२।।
रजो पुरुषोत्तमो रुक्मिनी गोपालदासकः । सारस्वतो रामदासो गदाधर महांस्तथा ।।३।।
वेणी माधवदासौ च अम्माक्षत्राणी वैष्णवी । हरिवंशश्चगोविंदो क्षत्री गज्जनधावनः ।।४।।
नारायणो ब्रह्मचारी क्षत्राणी जीयदासकः । देवा कपूर क्षत्री च दिनकरः पुरुषोत्तमः ।।५।।
मुकुंदः प्रभुदासश्च प्रभु त्रिपुरदासकौ । पूर्णमल्लौ यादवेंद्रः काश्मीरो माधवस्तथा ।।६।।
गुसांईदास गोपालो श्रीपद्मारावलस्तथा । जोशी पुरुषोत्तमो ज्ञेयो जगन्नाथो समन्वयः ।।७।।
नरहरि राणा व्यासः क्षत्राणी रामदासकौ । गोपालो कृष्णदासश्च प्रोहितो रामदासकः ।।८।।
बुलामिश्ररामानंदौ विष्णुजीवनदासकौ । सारस्वतो भगवान भगवान मुख्य सेवकः ।।९।।
गौडो अच्युतदासश्च अच्युतश्चक्रतीर्थकः । कन्हैयाशाल क्षत्री च नरहरिदासकस्तथा ।।१०।।
लघु पुरुषोत्तमो गोपालदास जनार्दनौ । कविराजो गडुस्वामी उत्तमश्लोकदासकः ।।११।।
ईश्वरोत्तमश्लोकाख्यो राजा माधवको तथा । सिंहनंदे सासु बहु परमांनद सूरकौ ।।१२।।
बाबा वेणु कृष्णदास छकडा वासुदेवकः । एक क्षत्राणी आनंददासो विश्वम्भरस्तथा ।।१३।।
ब्राह्मणी अथ कायस्थ नारायण स्त्रियस्तथा । अन्यमार्गीय कायस्थ दासो दामोदरस्तथा ।।१४।।
सिंहनंदे च क्षत्राणी जगतानंदकस्तथा । इन्द्रप्रस्थै चैकक्षत्री जट गोपालदासकः ।।१५।।
कृष्णदासः कुंभनश्च वाडवो बादरायणः । वैष्णवो संतदासश्च सुंदरदास मावजी ।।१६।।
नरहरिदास सन्यासी पांडे सदु भवानीका । श्रीमदाचार्य भक्तानाम नामानि बहवस्तथा ।।१७।।
तथापि स्वात्मपाठार्थेलिखितानिति क्षम्यतां । वार्तायां परिशोध्यानि सर्वदा वैष्णवैर्जनैः ।।१८।।

इति श्रीमद्वल्लभाचार्य भक्तानाम श्रीमद्गोकुलनाथजी कृत नामावली सम्पूर्णा ।